Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# साम्प्रतिकसमाजे आचारस्योपादेयता

**डॉ. प्रीति पारेश्वरी महान्ति**
**सहाचार्या, धर्मशास्त्रविभागः,**
**राजकीयसंस्कृतमहाविद्यालयः**
**भागलपुरः, बिहारः,**



**सारांशः** – स्मृतिशास्त्रेषु आलोचितविषयेषु आचार-व्यवहार-प्रायश्चित्तेषु आचारः अन्यतमः। आचारवान् लभते ज्ञानं, आचारो परमो धर्मः एतानि यानि ऋषिवचनानि सन्ति, तानि सर्वाण्येव अद्यतनसमाजस्य ध्येयानि भवन्ति। आचारबलेन सर्वेऽपि जनाः सदाचारवन्तः भूत्वा संसारे सुखेन स्थापयितुं समर्थाः भवन्ति। आचारहीनाः जनाः विशृङ्खलिताः भवन्ति। स्वस्य पारलौकिके जीवने अस्मिन् लोके च यथा यशस्विनः भवेयुः तन्निमित्तम् आचारपालनस्य आवश्यकता नितरां वर्त्तते। अतः साम्प्रतिकसमाजे तादृशः आचारस्योपादेयता प्रसङ्गे संक्षेपेण मया आलोच्यते।

**मुख्य शब्द**– स्मृतिशास्त्र, साम्प्रतिकसमाज, आचार, व्यवहार।

विहितमस्ति तत्र भवतां समेषां विश्ववासिनां हिताय बहुभिः ऋषिभिः बहूनि शास्त्राणि विरचितानि, परन्तु पाश्चात्यसभ्यतानुकरणसम्बेदनशीलाः जनाः एतेषु शास्त्रेषु विगतस्पृहा भवन्ति। येषां हृदये न कदाचिदपि धर्मभावना जागर्ति। तावत् सर्वदैव लोभ-मोह-मद-ऐश्वर्यादिभिः सम्बन्धिताः भूत्वा परद्रव्यापहरणे व्याकुलाः कथञ्चित्प्रकारेण स्वधनस्य वर्द्धनकामाः दृष्टिपथारूढाः भवन्ति। तेषां जनानां कृते शास्त्रस्य का आवश्यकता? परन्तु संसारेऽस्मिन् ये केचन अल्पसंख्यकाः धार्मिकभावनायुक्ताः धार्मिकाः भारतीयसंस्कृतेरुन्नायकाः सदाचारकुशलिनः जनाः सन्ति, तेषां धर्मबलेन इयं पृथिवी उज्जिवीता वर्त्तते। तेषामेव सज्जनानां कृते एतानि शास्त्राणि नितरां पूज्यतमानि

भवन्ति। आचारहीनानां जनानां बाहुल्यात् संसारोऽयं विनाशस्य समीपवर्ती भवति इति नास्ति तत्र विचिकित्सा काचिदपि। आचारबलेन सर्वेऽपि जनाः सदाचारवन्तः भूत्वा संसारे सुखेन स्थापयितुं समर्थाः भवन्ति। आचारहीनाः जनाः विशृङ्खलिताः भवन्ति। स्वस्य पारलौकिके जीवने अस्मिन् लोके च यथा यशस्विनः भवेयुः तन्निमित्तम् आचारपालनस्य आवश्यकता नितरां वर्त्तते। अतः श्रद्धाविहीनेऽपि समाजे जनानां संसारस्य च सुरक्षानिमित्तं चतुर्विधानां पुरुषार्थाणां प्राप्तये च आचार एव मुख्यो भवति। धर्महीनस्य पुरुषार्थयोग्यता न भवति। अतः आचारस्य श्रेयःसाधनत्वात् आचारवान् लभते ज्ञानं, आचारो परमो धर्मः एतानि यानि ऋषिवचनानि सन्ति, तानि सर्वाण्येव अद्यतनसमाजस्य ध्येयानि भवन्ति। उक्तं च मनुना आचारो समाजस्य अमङ्गलस्य अर्थात् अशुभस्य अनाचारस्य पापस्य विनाशनिमित्तं सर्वमान्यो भवति।

धर्मशास्त्रेषु वर्णितानां मुख्यभूतानां विषयाणां सम्यग्वर्णनम् आचार-व्यवहार-प्रायश्चित्तादिषु आध्यायेषु समुपलभ्यते। तत्रास्मिन् आचाराध्याये धर्मस्य चतुर्दशस्थानानि धर्मस्य ज्ञापक-कारक हेत्त्वादयस्तथा मनुष्यजीवनस्य मौलिकाचारोऽस्मादेवाचाराध्यायादेव प्राप्यन्ते। अतोऽस्याचारस्य महत्त्वं वरीवर्तते। तत्र धर्मस्योत्पत्तिनिरूपेणाचारोऽपि क्वचिद् वर्णितो दृश्यते। यदुक्तमस्ति श्रीविष्णुसहस्रनामस्तोत्रे- **आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः**। अर्थात् धर्म आचारतः जन्म लभते। यस्य च रक्षा भगवताऽच्युतेन क्रियते। प्रसङ्गेऽस्मिन् [i]वसिष्ठेनोक्तं यत्-

**आचारो परमो धर्मः सर्वेषामिति निश्चयः।**
**हीनाचारः परितात्मा प्रेत्य चेह च नश्यति।। इति।।**

आचारहीनः इहलोके न सुखं प्राप्नोति नापि परलोके, पुनश्चापि [ii]वसिष्ठेनोक्तं यत्-

**आचारहीनस्य तु ब्राह्मणस्य वेदाः षडंगास्त्वखिलाश्च यज्ञाः।**
**कां प्रीतिमुत्पादयितुं समर्था अन्धस्य दारा इव दर्शनीया।। इति।।**

अर्थात् आचारं विना वेदज्ञोऽपि सुखं नानुभवति। यथा अन्धस्य हृदये सुन्दर्याः प्रियतमायाः सौन्दर्यानुभूतेः सुखं न जायते। अस्मादेव कारणादस्मादकं भारतीयधर्मशास्त्राणि सर्वाणि आचारस्य महत्त्वं भूयो भूयः उपदिशन्ति। यथा तत्र धर्मशास्त्रकारैः स्पष्टमुद्घोषितं, यत्-

**आचारो भूतिजननमाचारो कीर्त्तिवर्द्धनः।**
**आचाराद् वर्धते ह्यायुराचारो हन्त्यलक्षणम्।। इति।।**

दीर्घजीवनसुखमयजीवनजापनार्थमेवाचारो निमित्तभूतः यश्चाचारो धर्मस्यापि मूलत्वेन स्वीकृतः। [iii]विष्णुपुराणे अस्य सदाचारस्य व्याख्याऽतीव सुन्दरतया विद्यते यथा-

**साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः।**
**तेषामाचरणं यत्तु सदाचार स उच्यते।। इति।।**

अर्थात् सच्छब्दादेव साधुत्वं प्रतीयमानं भवति। स एव साधुः यः दोषरहितः। साधुजनस्याचरणं सदाचारपदेनोच्यते। महर्षिणा [iv]मनुनापि सदाचार इत्थं व्याख्यातम्, यथा –

**सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्।**
**तद्देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते।।**
**तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।**
**वर्णानां सान्तरालानां स सदाचार उच्यते।। इति।।**

वर्णाश्रमरहितजातीनां स्वपरम्परागतप्राचीनसंस्कृतकर्त्तव्यम् एवाचारो वा सदाचार इत्युच्यते। सदाचारः नियतरूपेण शाश्वतकालं यावत् तिष्ठति। चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः इति मनुस्मरणादवगम्यते। उपनिषदि आचारशुद्धिविषयिणी चर्चा बहुत्र प्राप्यते। यथा- आचारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिशुद्धौ सर्वग्रन्थिनां विप्रमोक्षः। अर्थादाचारशुद्धिद्वारान्तःकरणस्यार्थात् आत्मनः शुद्धिरन्तकरणशुद्धेर्नियामिका स्मृतेरुदयस्ततः स्मृतेर्नाम बुद्धेः शुद्धिमाध्यमेन सर्वबन्धनात् मुक्तिर्लभ्यते।

तत्र पुनः सदाचारः कायिकवाचिकमानसिकभेदेन त्रिधा विभज्यते। स चापि जैनसम्प्रदाये सम्यक्ज्ञानम्, सम्यक् दृष्टिः, सम्यक् चरित्रमित्यादिपदेनोच्यते। एतेषु स्नानादिना पवित्रीकरणं, ब्रह्मचर्यपालनम्, अहिंसाचरणं, परोपकारः, देवपूजनमित्यादीनि कर्माणि कायिकसदाचारस्य अन्तर्गतानि भवन्ति। सत्यं प्रियं च सम्भाषणम्, सद्ग्रन्थानामध्ययनं, भगवन्नामकीर्त्तनादिकर्माणि वाचिकसदाचारस्यान्तर्गतानि भवन्ति। तथैव करुणाधैर्यसहानुभूतिशुद्धभावादीनि मानसिकसदाचारेऽन्तर्भुक्तानि।

याज्ञवल्क्यस्मृतेः आचाराध्याये मिताक्षराकारेण विज्ञानेश्वरेण षड्विधस्मार्त्तधर्मोऽभिहितः – वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति। धर्मस्य षड्विधत्वं

प्रतिपादितं तेन तत्र वर्णधर्मो ब्राह्मणो नित्यं मद्यं वर्जयेदित्यादिः, आश्रमधर्मो अग्नीन्धनभैक्षचर्यादिः, वर्णाश्रमधर्मो पलाशदण्डो ब्राह्मणस्येत्येवमादिः। गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः, निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तादिः, साधारणधर्मोऽहिंसादिः, मा हिंस्यात् सर्वभूतानि इत्याचाण्डालसाधारणो धर्मः। इत्यस्मिन् प्रसङ्गे भविष्यपुराणे उक्तमस्ति यत्-

**स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः।**
**वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम्।।**
**वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा।**
**वर्णत्वमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते।।**
**वर्णधर्मः स उक्तस्तु यथोपनयनं नृपः।**
**यस्त्वाश्रमं समाश्रित्य अधिकारः प्रवर्तते।।**
**स सत्वाश्रमधर्मस्तु भिक्षादण्डादिको यथा।**
**यो वर्णत्वमारभत्वं योऽधिकृत्य प्रवर्तते।।**
**स वर्णाश्रमधर्मस्तु मौञ्जी या मेखला यथा।**
**यो गुणेन प्रवर्त्तते गुणधर्मः स उच्यते।।**
**यथा मूर्द्धाभिषिक्तस्य प्रजानां परिपालनम्।**
**निमित्तमेवमाश्रित्य यो धर्मः संप्रवर्त्तते।।**
**नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा।। इति।।**

## पादटिप्पणी

[i].वसिष्ठधर्मसूत्रम् – 6/9
[ii].वसिष्ठधर्मसूत्रम्- 6/4
[iii].विष्णुपुराणम्- 3/11/3
[iv].मनुस्मृतिः – 1/17-18

## सन्दर्भग्रन्थसूची

**मनुस्मृतिः** – मन्वर्थमुक्तावलीसहिता, मोतिलाल वनारसीदास, दिल्ली, 1990

**याज्ञवल्क्यस्मृतिः** – मिताक्षराटीका सहिता, डा. गङ्गासागरराय सम्पादित, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।

**वसिष्ठधर्मसूत्रम्** – भण्डारकारप्राच्यविद्यासंशोधनागारम्, पुण्यपत्तनम्, 1930

**विष्णुपुराणम्** – गीताप्रेस, गोरखपुर, 1972